# ShrI Annapurnastotram

# શ્રીઅન્નપૂર્ણાસ્તોત્રમ્ અપરનામ અન્નપૂર્ણાષ્ટકમ્

## Document Information

Text title : annapurnaastotram 1

File name : annapurna.itx

Category : devii, pArvatI, stotra, shankarAchArya, annapUrNA, devI, aShTaka

Location : doc_devii

Author : Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Last three verses are from Annada Kalpa Tantra paTala 16

Source : Complete Works of Shankaracharya

Latest update : August 9, 2000, December 11, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીઅન્નપૂર્ણાસ્તોત્રમ્ અપરનામ અન્નપૂર્ણાષ્ટકમ્

નિત્યાનન્દકરી વરાભયકરી સૌન્દર્યરત્નાકરી
નિર્ધૂતાખિલઘોરપાવનકરી પ્રત્યક્ષમાહેશ્વરી । var ઘોરપાપનિકરી
પ્રાલેયાચલવંશપાવનકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૧॥

નાનારત્નવિચિત્રભૂષણકરી હેમામ્બરાડમ્બરી
મુક્તાહારવિલમ્બમાન વિલસત્ વક્ષોજકુમ્ભાન્તરી ।
કાશ્મીરાગરુવાસિતા રુચિકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૨॥

યોગાનન્દકરી રિપુક્ષયકરી ધર્માર્થનિષ્ઠાકરી
ચન્દ્રાર્કાનલભાસમાનલહરી ત્રૈલોક્યરક્ષાકરી ।
સર્વૈશ્વર્યસમસ્તવાઞ્છિતકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૩॥

કૈલાસાચલકન્દરાલયકરી ગૌરી ઉમા શઙ્કરી
કૌમારી નિગમાર્થગોચરકરી ઓઙ્કારબીજાક્ષરી ।
મોક્ષદ્વારકપાટપાટનકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૪॥

દૃશ્યાદૃશ્ય વિભૂતિવાહનકરી બ્રહ્માણ્ડભાણ્ડોદરી
લીલાનાટકસૂત્રભેદનકરી વિજ્ઞાનદીપાઙ્કુરી ।
શ્રીવિશ્વેશમનઃ પ્રસાદનકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૫॥

ઉર્વી સર્વજનેશ્વરી ભગવતી માતાઽન્નપૂર્ણેશ્વરી
વેણીનીલસમાનકુન્તલધરી નિત્યાન્નદાનેશ્વરી ।
સર્વાનન્દકરી સદાશુભકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૬॥

આદિક્ષાન્તસમસ્તવર્ણનકરી શમ્ભોસ્ત્રિભાવાકરી
કાશ્મીરા ત્રિજલેશ્વરી ત્રિલહરી નિત્યાઙ્કુરા શર્વરી ।
કામાકાઙ્ક્ષકરી જનોદયકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૭॥

દેવી સર્વવિચિત્રરત્નરચિતા દાક્ષાયણી સુન્દરી
વામે સ્વાદુપયોધરા પ્રિયકરી સૌભાગ્ય માહેશ્વરી ।
ભક્તાભીષ્ટકરી સદાશુભકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૮॥

ચન્દ્રાર્કાનલકોટિકોટિસદૃશા ચન્દ્રાંશુબિમ્બાધરી
ચન્દ્રાર્કાગ્નિસમાનકુણ્ડલધરી ચન્દ્રાર્કવર્ણેશ્વરી ।
માલાપુસ્તકપાશસાઙ્કુશધરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૯॥

ક્ષત્રત્રાણકરી મહાઽભયકરી માતા કૃપાસાગરી
સાક્ષાન્મોક્ષકરી સદા શિવકરી વિશ્વેશ્વરી શ્રીધરી ।
દક્ષાક્રન્દકરી નિરામયકરી કાશીપુરાધીશ્વરી
ભિક્ષાં દેહિ કૃપાવલમ્બનકરી માતાઽન્નપૂર્ણેશ્વરી ॥ ૧૦॥

અન્નપૂર્ણે સદાપૂર્ણે શઙ્કરપ્રાણવલ્લભે ।
જ્ઞાનવૈરાગ્યસિદ્ધ્યર્થં ભિક્ષાં દેહિ ચ પાર્વતિ ॥ ૧૧॥

માતા મે પાર્વતી દેવી પિતા દેવો મહેશ્વરઃ ।
બાન્ધવાઃ શિવભક્તાશ્ચ સ્વદેશો ભુવનત્રયમ્ ॥ ૧૨॥

॥ ઇતિ શ્રીશઙ્કરભગવતઃ કૃતૌ અન્નપૂર્ણાસ્તોત્રં સમ્પૂર્ણમ્ ॥

There are multiple variations of this popular stotra .
The more common version is given above. Following three verses
are inserted after verse number 10 in some printed editions.
These are taken from annadA kalpa tantra ShoDasha paTalam

ભગવતિ ભવરોગાત્પીડિતં દુષ્કૃતોત્થાત્
સુતદુહિતૃકલત્રોપદ્રવેણાનુયાતમ્ ।
વિલસદમૃતદૃષ્ટ્યા વીક્ષ્ય વિભ્રાન્તચિત્તં

સકલભુવનમાતસ્ત્રાહિ મામો નમસ્તે ॥ ૧૧॥

માહેશ્વરીમાશ્રિતકલ્પવલ્લીમહમ્ભવોચ્છેદકરી ભવાનીમ્ ।
ક્ષુધાર્તજાયાતનયાદ્યુપેતસ્ત્વામન્નપૂર્ણે શરણં પ્રપદ્યે ॥ ૧૨॥

દારિદ્ર્યદાવાનલદહ્યમાનં પાહ્યન્નપૂર્ણે ગિરિરાજકન્યે ।
કૃપામ્બુધૌ મજ્જય માં ત્વદીયે ત્વત્પાદપદ્માર્પિતચિત્તવૃત્તિમ્ ॥ ૧૩॥

Encoded by Kapila Shankaran
and Sunder Hattangadi

*ShrI Annapurnastotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*